महाभागोयतोऽसौ सात्त्विको निधिः। सुवर्णरूप्यताम्रादिधातूनां च परिग्रहम्। करोत्यतितरां सोऽपि तेषां च क्रयविक्रयम्। करोति च तथा यज्ञान् दक्षिणाश्च प्रयच्छति। सम्पादयति कामांश्च सर्वानेव यथाक्रमम्। सभादेवनिकेतांश्च स कारयति तन्मनाः १। सत्त्वाधारो निधिश्चान्यो महापद्म इति स्मृतः। सत्त्वप्रधानो भवति तेन चाधिष्ठितो नरः। करोति पद्मरागादिरत्नानाञ्च परिग्रहम्। स मौक्तिकप्रवालानां तेषां च क्रयविक्रयम्। ददाति योगशीलेभ्यस्तेषामावसथांस्तथा। स करोति च तच्छीलः स्वयमेव च जायते। तत्प्रसूतास्तथाशीलाः पुत्रपौत्रक्रमेण च। पूर्वर्द्धिमात्रः सप्तासौ पुरुषांश्च न मुञ्चति। महापद्मस्तु विप्राणां यज्ञार्थमुपजायते २। तामसो मकरो नाम निधिस्तेनावलोकितः। पुरुषोऽथ तमःप्रायः सुशीलोऽपि हि जायते। वाणखड्गर्ष्टिधनुषां चर्मणाञ्च परिग्रहम्। दंशनानाञ्च कुरुते याति मैत्रीञ्च राजभिः। ददाति शौर्य्यवृत्तीनां भूभुजां ये च तत्प्रियाः। क्रयविक्रयशस्त्राणां नान्यत्र प्रीतिमेति च। एकस्यैव भवत्येष नरस्य न सुतानुगः। द्रव्यार्थं दस्युतो नाशं संग्रामे वापि स व्रजेत् ३। कच्छपाख्यो निधिर्योऽन्यो नरस्तेनाभिवीक्षितः। तमःप्रधानो भवति यतोऽसौ तामसो निधिः। व्यवहारान् न शिष्टैश्च पण्यजातं करोति च। क्रियाः स्वा निखिलाश्चैव न विश्वसिति कस्यचित्। समस्तानि यथाङ्गानि निगृह्यास्ते हि कच्छपः। तथावष्टभ्य वित्तानि तिष्ठत्याकुलमानसः। न ददाति न वा भुङ्क्ते तद्विनाशभयाकुलः। निधानमुर्व्यां कुरुते निधिः सोऽप्येकपुरुषः ४। रजोगुणमयश्चान्यो मुकुन्दो नाम यो निधिः। नरोऽवलोकितस्तेन तद्गुणो भवति द्विज!। वीणावेणुमृदङ्गादिगीतवाद्यपरिग्रहम्। करोति गायतां वित्तं नृत्यतां च प्रयच्छति। वन्दिमागधसूतानां विटानां लास्यपाठिनाम्। ददात्यहर्निशं भोगान् भुङ्क्ते तैस्तु समं द्विज!। कुलटासु रतिश्चास्य भवत्यन्यैश्च तद्विधैः। प्रयाति सङ्गमेकं च स निधिर्भजते नरम् ५। रजःसत्त्वमयश्चान्यः कुन्दोनाम महानिधिः। उपैति स्तम्भमधिकं नरस्तेनावलोकितः। समस्तधातुरत्नानां पण्यधान्यादिकस्य च। परिग्रहं करोत्येष तथैव क्रयविक्रयम्। आधारः स्वजनानां चाप्यागताभ्यागतस्य च। सहते नापमानोक्तिं स्वल्पामपि महामुने!। स्तूयमानश्च महतीं प्रीतिं बध्नाति यच्छति। यं यश्चेच्छति वै कामं मृदुत्वमुपयाति च। बह्व्यो भार्य्या भवन्त्यस्य सूतिमत्योऽतिशोभनाः। तदन्वये सप्त नरान् निधिः कुन्दोऽनुवर्त्तते। प्रवर्द्धमानोऽनुनरमष्टभागेन सत्तम!। दीर्घायुश्चैव सर्वेषां पुरुषाणां प्रयच्छति। बन्धूनामेव भरणं ये च दूरादुपागताः। तेषां करोति वै कुन्दः परलोकेन चादृतः। भवत्यस्य न च स्नेहः सहवासिषु जायते। पूर्वमित्रैश्च शैथिल्यं प्रीतिमन्यैः करोति च ६। तथैव सत्त्वतमसी यो बिभर्त्ति महानिधिः। निधिः स नीलस्तत्सङ्गी नरस्तच्छीलभाग्भवेत्। वस्त्रकार्पासधान्यादिफलपुष्पपरिग्रहम्। मुक्ताविद्रुमशङ्खानां शुक्त्यादीनां तथा मुने!। काष्ठादीनां करोत्येष यच्चान्यज्जलसम्भवम्। क्रयविक्रयमप्येषां नान्यत्र रमते मनः। तडागान् पुष्करिण्यादीन् तथाऽऽरामान् करोति च। बन्धञ्च सरितां वृक्षांस्तथारोपयते नरः। अनुलेपनपुष्पादिभोगभोक्ताऽपि जायते। त्रिपूरुषश्चापि निधिर्नीलो नामेह जायते ७। रजस्तमोमयश्चान्यः शङ्खसंज्ञो हि यो निधिः। तेनापि नीयते विप्र! सद्गुणित्वं निधीश्वरः। एकस्यैव भवत्येष नरं नान्यमुपैति च। यस्य शङ्खो निधिस्तस्य स्वरूपं क्रोष्टुके! शृणु। एक एवात्मना मिष्टमन्नं भुङ्क्ते तथाऽम्बरम्। कदन्नभुक्परिजनो न च शोभनवस्त्रधृक्। न ददाति सुहृद्भार्य्यासुतपुत्रस्नुषादिषु। स्वपोषणपरः शङ्खी नरो भवति सर्वदा ८। इत्येते निधयः ख्याता नराणामर्थदेवताः। मिश्रावलोकिता मिश्रस्वभावफलदायिनः। यथाख्यातस्वभावस्तु भवत्येकविलोकनात्। सर्वेषामाधिपत्ये च श्रीरेषा द्विज! पद्मिनी"। २ऋषीणास्वरूपभूतपाठयुते २वेदे च। निधिगोपशब्दे दृश्यम्।

**निधिगोप** पु० निधिमृषीणास्वरूपभूतपाठो वेदस्तं गोपायति गुप–अण् उप०। अनूचाने "अथ यदेवानुब्रुवीत तेन ऋषिभ्य ऋणं जायते। तद्ध्येभ्य एतत् करोति ऋषीणां निधिगोपं ह्यनूचानमाहुः" शत०ब्रा० १।७।२।२

**निधिनाथ** पु० ६त०। कुवेरे त्रिका० निधीशादयोऽप्यत्र।

**निधुवन** न० नितरां धुवनं हस्तपादादिचालनमत्र। मैथुने १सुरतलीलायाम् अमरः। "निधुवनविनोदेन च मनुम्" कर्पूरस्तवः "नवनिधुवनलीलाः कौतुकेनाभिवीक्ष्य" माघः। नितरां धुवनम्। २अत्यन्तकम्पने च

**निधेय** त्रि० नि+धा–यत्। स्थाप्ये स्त्रियां टाप्। "श्रीश